- Title – न्यायसिद्धान्तमुक्तावली
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari - देवनागरी
- Language – संस्कृत
- Period –
- Beginning – द्रव्यकार्थप्रत्यासत्त्या ---
- End – विषयसंयोगस्था
- Colophon-
- Illustrations -
- Source -
- Subject - न्याय
- Revisor -
- Author -

1. Remarks- 6, 9, 13, 11, 12, 14, 15, 16
17, 18, 19

उपासना

द्विविधम्॥ [illegible] ॥ आद्यं यथा॥ घटादिकं प्रति कपालादि [illegible]
दिकार्यं [illegible] घटेन सह [illegible] ॥ [illegible] चित्समवायसम्बन्धेन [illegible]
यसम्बन्धेनेति फलितोर्थः॥ द्वितीयं च कार्य [illegible] कारणं कार्यप्रत्यासत्त्या कारणं ज्ञानादिविषयं [illegible] द्विकार
णमिति सामान्यलक्षणं पर्यवसन्नम्॥ अ [illegible] कारणं समवायिकारणभ्यां परं [illegible] कारणं [illegible]
येनिमित्तकारणमित्यर्थः॥ इदानीम [illegible] तद्रूपमाह॥ येन सह पूर्वभावः कारणमादाय वा यस्य॥
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्॥१९॥ यत्कार्यं प्रति कारणस्य पूर्ववर्तिता येन रूपेण गृह्यते तेन
कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः॥ यथा घटादिकं प्रति दण्डत्वादिकमिति द्वितीयमाह॥ यस्य स्वातन्त्र्येणान्व
यव्यतिरेकौ न स्तः किंतु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्॥ यथा दण्डरूपम्॥ तृतीयमा
ह॥ अन्यं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्॥
यथा घटादिकं प्रत्याकाशस्य॥ आकाशस्य हि घटादिकं प्रति जनकत्वं ग्राह्यम्॥ आकाशत्वं तदन्यथासिद्धम्
॥ शब्दाश्रयत्वेन तस्य कारणत्वे कान्यथासिद्धिरिति चेत्॥ पञ्चमीति गृहाण॥ अथाकाशस्य शब्दं प्रति जनक
त्वे किमवच्छेदकमिति चेत्॥ कवत्वादिकं विशेषपदार्थो वेति॥ चतुर्थमाह॥ जनकं प्रति पूर्ववर्तितामपरि
ज्ञाय न यस्य गृह्यते॥ अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः॥२०॥ यत्कार्यजनकं प्रति पूर्ववर्ति
त्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्॥ यथा कुलालपितुर्घटं प्रति
॥ तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः॥ कुलालत्वेन रूपेण जनकत्वे त्विष्टापत्तिः॥ कुला

कारणत्वमाकाशत्वेनैव स्मात् आकाशत्वं हि शब्दस
मवायिकारणत्वमेव च तच्च तस्य शब्दं प्रति जनकत्वं
गृहीत्वैव घटादिकं प्रति ६॥

न्या॰ मु॰
६

2

लमानस्य तदुत्पत्तिजनकत्वात्॥ पञ्चममाह॥ अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसम्भवे तद्भिन्नमन्य
थासिद्धमित्यर्थः॥ अत एव प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यत्वमन्यथासिद्धम्॥ नचवैपरीत्ये किं विनिगमक
मितिवाच्यम्॥ महत्त्वत्वजातेः कारणतावच्छेदकत्वेलाघवात्॥ एते पञ्चान्यथासिद्धा दण्डत्वादिकमादि
मम्॥ घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥२१॥ तृतीयं तु भवेद्व्योम कुलालजनकोपरः॥ पञ्चमो
रासभादिः स्यादेतेष्वावश्यकस्त्वसौ॥२२॥ यद्यप्यत्रव्यक्तिं प्रति रासभस्य नियतपूर्ववर्त्तित्वमस्ति तथापि घट
जातीयं प्रति [illegible] सिद्धकारणभावैर्दण्डादिभिरेव तत्तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः॥ एतेष्विति
॥ एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः॥ तेनैवापरेषां चरितार्थत्वात्॥ तथाहि॥ दण्डादि
भिरवश्यक्लृप्तनियतपूर्ववर्त्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्॥ नचवैपरीत्ये किं विनिगमक
मितिवाच्यम्॥ दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात्॥ एवमन्येषामप्यनेनैव चरि
तार्थत्वं सम्भवति॥ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्॥ स्पष्टम्॥ गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यस
मवायिहेतुत्वम्॥२३॥ असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमिति तात्पर्य
म्॥ अथ वासमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः॥ तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि
नाव्याप्तिः॥ अन्यत्र नित्यद्रव्येभ्यः आश्रितत्वमिहोच्यते॥ नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं
साधर्म्यमित्यर्थः॥ आश्रितत्वं तु समवायसंयोगान्यतरसम्बन्धेन वृत्तिमत्त्वम्॥ विशेषणतया नित्यानामपि कालादौ
वृत्तेः॥ इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमुपक्रमते॥ क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता॥२४॥

आत्मविशेषगुणे
ध्यान्तरतो वैधर्म्य
परतया मूलं व्याख्या
तम्॥५

साधर्म्यप्रकरणे वैधर्म्यकथन
मयुक्तमित्याशयादाह अथवेति॥४

[illegible] ...त्वद्... [illegible]

म्॥ न चाणुकः स्थूलो [illegible] ऽपि रिति वदुत्वन्ते॥ [illegible]

रतीन्द्रियत्वे [illegible] न्द्रियसन्निधाने तस्यैव प्रत्यक्षत्वात्॥ न च [illegible]

दानीं [illegible] परमाणुपुञ्जस्यो [illegible] वाच्यम्॥ अदृश्यस्य दृश्यानुपादानत्वात्॥ अन्यथा

चक्षुरादिसन्निकर्ष [illegible]॥ न चानित्यत्वे नैतादौ कथमदृश्यद्रव्यसत्त्वे [illegible] स्यादिति

रिति वाच्यम्॥ तत्र तदवयवः पादिदृश्यद [illegible] नाभ्युपगमात्॥ न चादृश्येन द्व्यणुकेनकपर्द

त्र्यणुत्रसरेणोः [illegible]॥ [illegible] त्वं वाकस्यान्वितत्वमुपादानाच्च नम्येदे॥ परं तु महत्त्वोद्भू

त रूपादिकारणसमुदायवत्त्वाद् दृश्यत्वम्॥ तदभावे च [illegible] त्वं त्रसरेणोर्महत्त्वात्तद्भुवम्॥ न तु द्व्यणुकादेस्तदभा

वात्॥ न हि तत्त्वमनन्तेषांदसम्भवति॥ इत्थं चावयवदिसिद्धौ तेषां मुक्त्यानित्वविनाश्यत्वेः प्रत्यक्षसिद्धत्वादनित्यत्वम्॥

तेषां चावयववादत्वविधारायामनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः॥ अतः क्वचिद्विश्रामो वाच्यः॥ यत्र च विश्रा

मस्तस्य नित्यत्वे असमवेतकार्यत्वानिप्रसङ्गात्॥ तस्य नित्यत्वम्॥ महत्परिमाणतारतम्यस्य गगनादौ विश्रान्त

त्ववित्य अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रा [illegible] परमाणुत्वसिद्धिः॥ न च त्रसरेणावेव विश्रामो

स्त्वि [illegible] ति वाच्यम्॥ त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावय

[illegible] महत्त्वारम्भकत्वात्॥ न चैवं क्रमेण तदवयवधाराभिर्द्धिरिति वाच्यम्॥ अनवस्थाभयेन तदसिद्धेरिति॥ साकार्य

रूपा [illegible] त्रिविधा शरीरेन्द्रियविषयभेदादित्यर्थः॥ तत्र देहमुदाहरति॥ योनिजादिभवेद्देहमिन्द्रियंघ्राणलक्ष

म्॥ विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः॥ ३॥ योनिजमयोनिजं च योनिजमपि जरायुजमण्डजं च जरायुजं म

कपालवटित [illegible] नेनतदवयव उ ... नि

सिद्धेः॥ ३॥

परमाणोर्महत्त्वा भावात्

न्या० मु०
६

रीनामण्डजं पीण्डं योनिजं स्वेदजोद्भिदादिकम्॥ स्वेदजाः कृमिदंशाद्याः॥ उद्भिदस्तरुगुल्माद्याः॥ नारकि
शरीरमप्ययोनिजम्॥ न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम्॥ गन्धादिमत्त्वस्यैव प्रमाणत्वा
त्॥ न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्॥ तथा सति जलत्वपृथिवीत्वादिना सङ्क
रप्रसङ्गात्॥ न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यम्॥ क्लेदादीनां विनाशेऽपि शरीरत्वेन
प्रत्यभिज्ञानात्॥ गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः॥ तेन पार्थिवादिनां शरीरे जलादीनां निमित्तत्वमात्रं बो
ध्यम्॥ शरीरत्वं न जातिः॥ पृथिवीत्वेन सङ्करात्॥ किन्तु चेष्टाश्रयत्वं॥ वृक्षादीनामपि चेष्टासत्त्वान्नाव्या
प्तिः॥ न च वृक्षादिशरीरत्वे किं मानमिति वाच्यम्॥ आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात्॥ तत्रैव किं मानमिति
चेत्॥ भग्नक्षतसंरोहणादिना तदुन्नयनात्॥ यदि हस्तादौ शरीरव्यवहारो न भवति तदा अन्त्यावयवित्वेन विशे
षणीयम्॥ न च परशरीरे चेष्टानज्ञानात् व्याप्तिरिति वाच्यम्॥ तादृशप्रमाणाभावात्॥ अथवा चेष्टावद
न्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्॥ अन्त्यावयविमात्रवृत्ति चेष्टावद्वृत्तिजातिमत्त्वं वा॥ तत्र च मानुष
त्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः॥ न च नृसिंहशरीरे कथं लक्षणसमन्वयः॥ तत्र नृसिंहस्यैकव्यक्ति(?)
त्तितया जातित्वाभावात्॥ जलीयतैजसशरीरवृत्तित्वात् यदि वा तस्यापि जातित्वाभावादिति वाच्यम्॥ कल्पभेदेन नृसिं
हशरीरस्य नानात्वेन नृसिंहजात्या लक्षणसमन्वयात्॥ इन्द्रियमिति॥ घ्राणेन्द्रियं पार्थिवमित्यर्थः॥ पार्थिवत्वं
कथमिति चेदित्थम्॥ घ्राणेन्द्रियं पार्थिवं रूपादिषु पञ्चसु मध्ये गन्धस्यैव व्यञ्जकत्वात्॥ कुङ्कुमगन्धाभिव्यञ्ज
कघृतादिवत्॥ न च दृष्टान्ते रूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम्॥ परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्॥
न च नवशरावगन्धव्यञ्जकजले व्यभिचार इति वाच्यम्॥ तस्य सक्तुरसाभिव्यञ्जकत्वात्॥ यद्वा परकीयेतिन

वायुसंबंधानुमानात्

हिताहितप्राप्ति साधी(?) क्रिया...

न्याम० ६

अत्र तः शब्दप्रमानाश्रितं ... वेदानं ... यत्त्वादिप्रत्यक्षमानेन सिध्यति ॥

...श्चाविकारणं नवमं द्रव्यं गगनं सिध्यति । न च वायव्यवयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द
उत्पद्यतामिति वाच्यं । अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् । तत्र शरीरस्य वाभावात् । इंद्रि
यं दर्शयति । इंद्रियं तु भवेच्छ्रोत्रं । नन्वाकाशलाघवादेकं सिद्धं श्रोत्रं तु पुरुषभेदाद्भिन्नं कथमाका
शं स्यादत आह । एकः सन्नप्युपाधितः । आकाश एकः सन्नप्युपाधेः कर्णशष्कुल्या
भेदाद्भिन्नं श्रोत्रं भवतीत्यर्थः । कालं निरूपयति । जन्यानां जनकः कालः । तत्र प्रमाणं दर्शयितुमाह । जगता
माश्रयो मतः । तथाहि । इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पंदनाकं विषयीकरोति । तदा सूर्यपरिस्पं
दादिना घटादेः संबंधो वाच्यः । स्वसंयोगादिर्न भवति । इति काल एव संबंधघटकः कल्प्यते । इत्थं च तदा
श्रयत्वमेव सम्यक् । प्रमाणांतरं दर्शयति । परापरत्वधीहेतुः । परत्वादिबुद्धेरसाधारणनिमित्तं काल एव । पर
त्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादेकः कल्प्यते इति भावः । नन्वेकस्य कालस्य सिद्धौ क्ष
णादिनमासवर्षादिसमयभेदो न स्यादत आह । क्षणादिः स्यादुपाधितः । कालस्त्वेकोप्युपाधिभेदात्क्षणादि
व्यवहारविषयः । उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म । पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयो

॥ परत्वापरत्वबुद्धिं प्रति परत्वे निमित्तं तत्र काल पिंडसंयोगस्तत्र काल इति क्रमेण परं परस्या कालस्य तद्बुद्धौ निमित्तत्वं इत्येवं दैशिके दिशा ॥४

...रीजन्यनाश ...गियद्यन्नाड

वायौ निरा...

स्वसमवायिसंयुक्तसंयोगः ॥५

कार्यतावच्छिन्नं प्रति निमित्तकारणं आग्र... इत्यादिप्रत्ययस्तत्र मानम् ॥५

बु॥ परत्वापरत्वयोः परापर... वायिकारणं... संयोगस्य... अपेक्षा...

यदपेक्षयोदयगिरिसन्निहि… …तः प्राचीत्यर्थः। तदपेक्षयोद…
रिसन्निहितत्वं च तस्य तन्नि… …गिरिसंयुक्तसंयोगापेक्षयाल्पतरोदयगि
रिसंयुक्तसंयोगवत्त्वम्। यथायथं गुरुतायाः आत्मांशयोगः॥६

गतत्वावच्छिन्नोत्तरसंयोगप्रागभावो वा। उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं क्षणव्य
वहारो न स्यादिति वाच्यं। कर्मान्तरसत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदा ध्वंसेनाय
त्याध्वंसेनैवोपपादनीयमिति। दिशं निरूपयति। दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते। दूरत्वमं
तिकत्वं च दैशिकं परत्वमपरत्वं च बोध्यं। तद्धेतुः साधारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोर
समवायिकारणं संयोगाश्रयस्यापि दिक् सिध्यतीति भावः। नन्वेकैव दिग् यदि तदा प्राच्यादिव्यव
हारः कथमुपपद्यतामत आह। उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्। यत्पुरुषस्योदयगि
रिसन्निहिता या दिक् तत्पुरुषस्य सा प्राची। एवमुदयगिरिव्यवहिता च प्रतीची। तत्पुरुषीयसुमे
रुसन्निहिता दिगुदीची। तद्व्यवहिता त्ववाची। सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति निय
मात्॥ आत्मानं निरूपयति। आत्मेन्द्रियाद्यधिष्ठाता॥ आत्मत्वजातिस्तु सुखदुःखसमवायिका
रणतावच्छेदकतया सिध्यति। ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावाच्च न सुखदुः
खे वा …त्पत्तिः। नित्यसुखस्वरूपोऽप्यस्य फलावपृष्भाव इत्यस्याप्रयोजकत्वात्॥ अपरे

…नखलं… केश… …न परमणिरोहुतुत्पत्ता… …यमेमा नाभावादितिभावः॥१

Marginal notes (left): …ध्वंसप्रतियोगिक …ध्वंसविशिष्टसमय …व्यवहारविष …त्वादितिभावः॥२

…रेवृष्ट …तुतावीश्व …

Marginal notes (right): …कादि… नहीश्वरेऽपि सुखादु… सतिरस्तु तत्र… हल

जलपरमाणौ अतिव्याप्तिवारणाय पार्थिवेति विशेषणं ॥

पृथिव्याः पक्षीकृत यीतिमाश्रय...
तस्यैव तत्रासंभवादिति ना... ॥ स्पर्शेन ॥६॥

नातिसिद्धो ॥४

रूपविजातीयस्पर्शवान् पानविकरणपार्थिवत्वात्। तत्र जलमध्यस्थपीतरूपवत्। तस्यैव पृथिवीजलाभ्यां
स्यतेजस्त्वनियमात्। वायुं निरूपयति। अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः। अनुष्णाशीतस्पर्शः
स्पृथिव्यां व्यामपि सत्त्वादुक्तमपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति
एतेन वायवीयो विजातीयस्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमित्यर्थः। तिर्यग्गमनवानेष ज्ञेयः स्
र्शादिलिंगकः। एष वायुः स्पर्शादिलिंगकः। वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते। विजातीयस्पर्शेन वि
लक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपेन वायोरनुमानात्। यथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्यते। [illegible]
[illegible] पूर्ववन्नित्यताद्युक्तं। वायुर्हि द्विविधो नित्योऽनित्यश्च। परमाणुरूपो नित्यस्तदन्यो
ऽनित्योऽवयवसमवेतश्च। सोऽपि त्रिविधः। शरीरेंद्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनां।
परं तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टंभकत्वादुपभोगक्षमत्वं। जलादीनां प्राधान्या
ज्जलीयत्वादिकमिति। अत्र तयोर्विशेषस्तमाह। देहव्यापि त्वगिंद्रियं। शरीरव्यापकं स्पर्शग्राहकमिं
द्रियं त्वक्। तच्च वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैव व्यंजकत्वात्। अंगसंगिसलिलशैत्यव्यंजक

व्यजनरलोमकेशानां त्वगिंद्रियानाधारत्वात् संभवः तेषां संयोगिद्रव्यत्वेन शरीरत्वाभावात् ॥

कालादावतिव्याप्तिवारणायेंद्रियमिति चक्षुरादौ तद्वा... स्पर्शेति ॥२॥

वाय्वादौ रूपाभावादि ति भावः ॥२

॥ यद्यप्यपाकजानुष्णा-
शीतस्पर्शोऽपि पृथ्व्यादाव
स्ति तथापि पाक
जानुष्णाशीतस्पर्शवद्
वृत्त्यनुष्णाशीतस्पर्शव
द्वृत्तिद्रव्यत्वसाक्षाद्व्या
प्यजातिमत्त्वमर्थः ॥४॥

ननु करोकां...
...स्पर्शव्यंजक...
...एवं...

वजपवनवत्। अत्रापिसन्निकर्षेव्यभिचारवारणायद्रव्याव्याविशेषणं। विषयंनिरूपयति। प्राणा
दिरुक्तमहावायुपर्यंतोविषयोमतः। यद्यप्यनित्योवायुश्चतुर्विधस्तस्यचातुर्विध्यंप्राणादिनेसुक्तमाक
तव्याप्यत्रसंक्षेपात्त्रैविध्यमुक्तं। प्राणस्त्वेकएवहृदयादिनानास्थानवशान्मुखनिर्गमनादिनानाक्रि
यावशाच्चनानासंज्ञांलभते। आकाशंनिरूपयति। आकाशस्यतुविज्ञेयः शब्दोवैशेषिकोगुणः। आ
काशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकंतुनजातिः। किंतुआकाशत्वंशब्दाश्रयत्वं। वैशेषि
कइतिकथनंतुविशेषगुणांतरव्यवच्छेदाय। एतेनप्रमाणमपिदर्शितं। तथाहि। शब्दोगुणः। चक्षुर्ग्रहणा
योग्यबहिरिंद्रियग्राह्यजातिमत्त्वात्। स्पर्शवत्। शब्दोद्रव्यसमवेतोगुणत्वात्संयोगवदित्यनुमानेनशब्द
स्यद्रव्यसमवेतत्वेसिद्धे। शब्दोनस्पर्शवद्विशेषगुणः। तेजःसंयोगासमवायिकारणकत्वाभावेसत्यकारण
गुणपूर्वकप्रत्यक्षत्वात्सुखवत्। पाकजरूपादौव्यभिचारवारणायसत्यंतं। पटरूपादौव्यभिचारवारणा
याकारणगुणपूर्वकेति। जलपरिमाणरूपादौव्यभिचारवारणायप्रत्यक्षेति। नदिक्कालमनोगुणोऽवि
शेषगुणत्वात्गंधादिवत् व्यतिरेकेसंयोगवत्। नात्मविशेषगुणः बहिरिंद्रियग्राह्यत्वाद्रूपवत्। इ

समवायेनशब्दाधिकर
णत्वेतेननकालादाव
तिप्र०॥५
घटादौव्यभिचारवारणा
यायोग्यांतं आत्मनिन
वारणायग्राह्यांतरस
...
भावात् ऽपिनाध
र्मिगतसंख्यादिगुणा
नामपियोग्यमात्रा
वृत्तित्वाद्व्या...
व्याप्तिः...

४ चंद्रकिरणांतर्गतजलभागशीतस्पर्शेन ॥६

॥उष्णत्वजातिसिद्धौ ॥

ननु करकादि [illegible] तत्प्रत्यक्षद्रव्यांत र एव द्रवत्वजलत्वं योः प्रत्यक्षेण करका दावत आह यद्द्रव्य मिति ॥२॥ जन्यतेजस्त्वावच्छिन्न जनकतावच्छेदकतया तेजःपरमाणौ तेजस्त्व जातिः ॥४ शुक्ले निखिलरूपकथनं भास्वररूपमात्रस्य लक्षणत्वे निप्रसंगा भावात् ॥७ अपि नाधि गतसंख्यादिगुणा नामपि योग्यमात्रा वृत्तित्वाच्चाक्षुष त्वापत्तिः समुच्चीयते

योमतः ॥ सिंधुः समुद्रः ॥ हिमं तुषारः ॥ आदिपदात्करिकासारकरकादिः सर्वोपि ग्राह्यः ॥ ननु हिमकरकयोः
कठिनत्वात्पार्थिवत्वमिति वाच्यं । ऊष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्षसिद्धत्वात् । यद्द्रव्यं यद्द्रव्यध्वंस
जन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः । अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायां काठिन्यप्रत्ययस्य
भ्रांतत्वात् । तेजो निरूपयति । उष्णः स्पर्शस्तेजसस्तु स्यात् ॥ उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः । इत्थं च ।
जलोष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः ॥ पारमाणुष्वनित्यत्वं तु जलत्वस्येवानुसंधेयं ॥
नचोष्णस्पर्शवत्त्वं चंद्रकिरणादावव्याप्तमिति वाच्यं । तत्राप्युष्णस्पर्शसत्त्वात् । किंतु तदंतःपातिजलस्पर्शेना
भिभवादग्रहः । एवं च किरणानां पार्थिवस्पर्शेनाभिभवाच्चक्षुरादेर्वानुद्भूतत्वादग्रहः । रूपं शुक्लं भास्वरं । वैश्वान
रे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लरूपाग्रहः ॥ अथ तद्रूपाग्रहे धर्मिणोपि चाक्षुषत्वं न ।
स्यादिति चेन्न प्रदीपरूपेणैव धर्मिणो ग्रहसंभवात् । शंखस्येव पित्तपीतिम्ना । वह्नेः शुक्लं रूपं नाभिभूतं किं
तु तदीयशुक्लत्वमित्यन्ये । नैमित्तिकं द्रवत्वं तु । सुवर्णादिरूपे तेजसि तत्सत्त्वात् । नच नैमित्तिकद्रवत्वं दहनाद
व्याप्तं घृतादावतिव्याप्तं चेति वाच्यं । पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षि

दौ

तु चक्षुरादिनिष्ठस्पो ष्णस्पर्शस्य केनाप्यनभिभ वात्प्रत्यक्षत्वमत आ ह ॥७ आदिना हेम ग्रु ॥८

तेन नासंग्रह इति शेषः ॥२

॥द्रव्यत्वमादाय पृथिव्यादावतिव्याप्तिवारणाय पृथिव्यवृत्तीति । तेजोवायुत्वादिकमादाय वाय्वादौ तन … अद्यत्वसत्त्वा
युते तेजोन्यतरत्वमादाय वायौ … णाय जातीति ॥१॥

विज्ञारीरेणि

तत्वात्॥ नित्यतादि प्रथमवत् । जलस्येवेत्यर्थः । तथाहि । तद्विविधं । नित्यमनित्यं च । नित्यं परमाणुरूपं । तदन्य-
दनित्यमवयवसमवेतं च । तच्चत्रिधा । शरीरेंद्रियविषयभेदात् । शरीरमयोनिजमेव । तच्च सूर्यलोकादौ प्रसि-
द्धं । तत्र यो विशेषस्तमाह । इंद्रियं नयनं । चक्षुस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वा-
त् प्रदीपवत् । प्रदीपस्य स्वीयस्पर्शव्यंजकत्वात् प्रथमं परकीयेति घटादेः स्वीयरूपव्यंजकत्वाद्व्यभिचारवारणा-
य द्वितीयं परकीयेति । अथवा प्रमायां दृष्टांतत्वसंभवादाद्यं परकीयेति । नदेयं । चक्षुःसन्निकर्षे व्यभिचारवारणा-
य द्रव्यत्वं देयं । विषयं दर्शयति । वह्निस्वर्णादिविषयो मतः । ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न सुवर्णं
तैजसं । असति प्रतिबंधके अत्यंतानलसंयोगेप्यनुच्छिद्यमानजन्यद्रवत्ववत्त्वात् । यन्नैवं तन्नैवं यथा पृथ्वी-
ति । नचाप्रयोजकं पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चाग्निसंयोगनाश्यत्वात् । ननु पीतिमगुरुत्वाश्रयस्य
पीतिमगुरुत्वाश्रयस्य
पार्थिवस्यापि तदानींद्रुतत्वात्तेन व्यभिचार इति चेन्न । जलमध्यस्थमषीक्षोदकस्याद्रुतत्वात् । अपरे तु । पी-
रूपप रा वृत्ति
तिमाश्रयस्यात्यंताग्निसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात् । तत्र प्रतिबंधकविजातीयद्रवद्रव्यवत्त्वं कल्प्यते । त-
थाहि । अग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः ॥ अत्यंताग्निसंयोगेपि पूर्व-

अग्निसंयोगस्य तैजससुवर्णेपि सत्वाद्रूपं पीतिमेति॥१॥

॥अग्निसंयोगरहिते पूर्वविजातीयरूपानाधारे घटे व्यभिचारवा-
रणायाग्निसंयोगेपि इतियत्पाकयंचिदग्निसंयुक्तघटे व्यभि-
चारवारणायात्यंतेतिपदं॥१॥

जलधृतद्रूयमान
घृतादौ व्यभिचार
वारणायासतिप्रति-
बंधके इति । अग्नि-
संयोगानाश्यद्रव-
त्ववति घृतादौ तद्वा-
रणाय अत्यंतानल-
संयोगेति॥१॥

अनुच्छिद्यमानद्रवत्वा-
धिकरणत्वादित्यर्थो
न तु च्छिद्यमानद्रव-
त्वानधिकरणत्वादि-
ति गगनादौ व्यभिचा-
रात्॥१

त्मका...हेतु...भिचारवारणाय यदुक्तं पदद्वयं व्याप्तिज्ञाने निविष्टम् ॥ रसं च पाषाणे रसालोः पृथिवीत्वात्
...सामाण...पि पृथिवीत्वम् ॥ न चात्र तस्यापि गन्धवत्त्वे बाधकाभाव ॥ नानारूपेति ॥ शुक्लनीलादिभेदेन ना
नाजातीयं रूपं पृथिव्यामेव वर्त्तते ॥ न तु जलादौ ॥ तत्र शुक्लस्यैव सत्त्वात् ॥ पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकव
शेन नानारूपसम्भवात् ॥ न च नानारूपं यत्र नीलपीतं तत्राव्याप्तिः ॥ रूपद्वयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य ॥ रू
पनाश्रवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वाच्यत्वात् ॥ वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्त
रस्य च सत्त्वात् ॥ न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ॥ षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः
॥३५॥ मधुराम्लकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव ॥ जले तु मधुर एव रसः ॥ अत्रापि पूर्ववद् रसद्वयवृ
त्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थो बोध्यः ॥ गन्धस्तु द्विविध इति ॥ वस्तुस्थितमात्रेण न तु द्विविधगन्धवत्त्व
मिति लक्षणं द्विविधस्य व्यर्थत्वात् ॥ द्विविधं च सौरभासौरभभेदेन ज्ञेयम् ॥ स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीत
पाकजः ॥ तस्याः पृथिव्या अनुष्णाशीतस्पर्शत्वं वा यावदपि वर्त्तते स्पर्शस्तत् पाकज इति ॥ इदं च पृथिव्याः स्पर्शो
ऽनुष्णाशीत इति ज्ञापनार्थमुक्तम् ॥ पाकजस्पर्शवत्त्वमात्रं लक्षणम् ॥ अधिकस्य वैयर्थ्यात् ॥ यद्यपि पाकजस्प
र्शः पटादौ नास्ति ॥ तथापि पाकजस्पर्शवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः ॥ नित्यानित्या च सा द्वेधा नि
त्या स्यादणुलक्षणा ॥३६॥ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी ॥ सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्त
था ॥३७॥ सा पृथिवी द्विविधा नित्यानित्या चेत्यर्थः ॥ अणुलक्षणा परमाणुलक्षणा पृथिवी नित्या ॥ तदन्या परमा
णुभिन्ना पृथिवी द्व्यणुकादिः ॥ सर्वाप्यनित्येत्यर्थः ॥ सैवानित्या पृथिवी ॥ अवयववतीत्यर्थः ॥ ननु अवयविनि
किं मानम् ॥ परमाणुपुञ्जैरेवोपपन्नेः ॥ न च परमाणूनामतीन्द्रियत्वाद् घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यम्

रामः

द्रवः॥२८॥ पृथिवीतेजसोरित्यर्थः नच नैमित्तिक[illegible]दौ [illegible]दौ चाव्याप्तिमितिवाच्यम् नैमित्तिकद्रवत्वसमा
नाधिकरणद्रवत्वत्वव्याप्यजातिमत्त्वस्य[illegible]विवक्षितत्वात् ॥ आत्मानोभूतवर्गस्य विशेषगुणयोगिनः॥ पृथिव्यप्ते
जोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः॥ यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्॥२९॥ ज्ञेयत्वादि
कं विहायेति बोध्यम् तत्तु नकस्यापि वैधर्म्यं केवलान्वयि[illegible]त्॥ स्पर्शादयोष्टौ वेगाख्यः संस्कारो मरुतो गुणाः
॥ स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः॥३०॥ स्पर्शादयोष्टौ वेगश्च द्रवत्वं च गुरुत्वकम्॥ रूपं रसस्त
था स्नेहो वारिण्येते चतुर्दश॥३१॥ स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश॥ बुद्ध्यादिषट्कं संख्यादिपञ्चकं वेगः
भावना तथा॥३२॥ धर्माधर्मौ गुणा एते चात्मनः स्युश्चतुर्दश॥ संख्यादिपंचकं कालादिषु शब्दश्च ते च
खे॥३३॥ संख्यादयः पंच बुद्धिरिच्छा यत्नोपि चेश्वरे॥ परापरत्वे संख्यादि पंच वेगश्च मानसे॥३४॥ वा
योर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश॥ दिक्कालयोः पंच षडेव चाम्बरे महेश्वरेष्टौ
मनसस्तथैव च॥३५॥ तेच संख्या[illegible]दयः[illegible]खेष्वाकाशे साधर्म्यवैधर्म्ये निरूप्य सम्प्रति प्रत्येकं पृथिव्यादिकं
निरूपयति॥ तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥ गन्धसमवायिकारणमित्यर्थः यद्यपि गन्धवत्त्वमात्रं लक्षण
मुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् तथाहि पृथिवीत्वं हि गन्धसमवायिका
रणतावच्छेदकतया सिद्ध्यति अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः नच पाषाणादौ गन्धाभावाद्गन्धवत्त्व
मव्याप्तमिति वाच्यम् तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनोपपद्यते कथमन्यथा तद्भस्मनि गन्ध
[illegible] पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिद्ध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपा
दानोपादेयमिति व्या[illegible] दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये घटध्वंसजन्यघटध्वंसप्रत्यये मिथ्याज्ञानध्वंसज
उद्भूतत्वेन ८४

नियतकारणनियम
त्वापत्तेः ८४

त्वीश्वरे सा जातिर्नास्ति प्रमाणाभावात् । न च दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादित्याकूतः । इंद्रियाद्य
धिष्ठातेति । इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः । यद्यप्यात्मन्यहं जानन्नहं सुखीत्यादिप्रत्यक्ष
विषयत्वमस्त्येव । तथापि विप्रतिपन्नं प्रति प्रथममेव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपा
दयितुं न शक्यत इत्यतः प्रमाणं दर्शयति । करणं हि सकर्तृकं । वास्यादीनां छिदादिकरणानां कर्त्तारमं बहोजा
तरेण फलानुपधानं दृष्टं । एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्त्तारमंतरेण नोपपद्यत इ
त्यतिरिक्तः कर्त्ता कल्पते । न तु शरीरस्यैव कर्तृत्वमस्त्वित्यत आह । शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः
ननु चैतन्यं ज्ञानादिकमेव । मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः । प्राणाभावे
न ज्ञानाद्यभावस्य सिद्धेरिति चेन्न । शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः । शरीराणा
मवयवोपचयापचयैरु त्पादविनाशशालित्वात् । न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्प
द्यत इति वाच्यं अनंतव कारकल्पनागौरवात् । एवं शरीरस्य चैतन्ये बालस्य स्तनपाने प्रवृत्तिर्न स्यात् । इष्ट
साधनताज्ञानस्य तद्धे तु । तदानीमिष्टसाधनत्वानुभावकाभावात् । मन्मते तु जन्मांतरानुभूतेष्टसाधनत्वस्म

धागमाव नाशासंभवा- ... स्यावेति॰२

तदानीं स्मरणाद्यनुपपत्तिः। न च जन्मांतरानुभूतमप्यस्मर्येतेति वाच्यं। उद्बोधकाभावात्। संस्कारनाशाद्वा॥
अत्र त्वनादेस्तस्याजीवनादृष्टमेवोद्बोधकं कल्प्यते। एवं पूर्वजन्मन्यपि तत्पूर्वजन्मानुभूतं स्मर्यते। इत्थं च संसा
रस्यानादित्वात् आत्मनो नादित्वसिद्धावनादिभावस्य नाशासंभवान्नित्यत्वं संभवतीति बोध्यं। ननु चक्षु
रादीनामेव ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह। तथात्वं चेदिंद्रियाणामुपघा
ते कथं स्मृतिः। तथात्वं चेतनत्वं। उपघाते नाशे सति चक्षुरादीनामेव। कथं स्मृतिः। पूर्वं चक्षुषा साक्षा
त्कृतानां चक्षुषोऽभावे स्मृतिर्न स्यादनुभवितुरभावात्। अन्यानुभूतस्यान्येन स्मरणायोगात्। अनुभवस्मर
णयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः। ननु चक्षुरादीनां चैतन्यमास्तु मनसस्तु नित्यस्य चै
तन्यं स्यादत आह। मनोऽपि न तथा। न तथा चेतनं। ज्ञानाद्यनध्यक्षं तदा भवेत्। मनसोऽणुत्वात् प्रत्यक्षे च महत्त्व
स्य हेतुत्वात् मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः। यथा मनसोऽणुत्वं तथाग्रे वक्ष्यते। नन्व
स्तु विज्ञानमेवात्मा तस्य स्वतः प्रकाशरूपत्वाच्चेतनत्वं ज्ञानसुखादिकं तु तस्यैवाकारविशेषः। तस्यापि भाव
त्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात्। सुषुप्तावप्यालयविज्ञानधारा निराबाधैव

विज्ञानवादीनां॰२

घटोयमिति वृत्तिः ... ानं अहमहमिति
ज्ञानमालयाविज्ञान· ॥१

मृगमदवासनया वसनइव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रांतत्वान्नानुपपत्तिः स्म
रणादेरिति चेन्न तस्य जगद्विषयत्वे सार्वज्ञ्यापत्तेः । यत्किंचिद्विषयत्वे सार्वज्ञ्यापत्तेः । यत्किंचिद्विषयक
त्वे विनिगमकाभावः । सुषुप्तावपि विषयावभासप्रसंगश्च । तदानीं निराकारा चित्संततिरनुवर्त्तत इति चे
न्न तस्य प्रकाशत्वे प्रमाणाभावात् । अन्यथा घटादीनामपि विज्ञानत्वापत्तिः । नचेष्टापत्तिर्विज्ञानव्यतिरि
क्तवस्तुनोऽभावादिति वाच्यं । घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् । आकारविशेष एवायं विज्ञा
नस्येति चेत्किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन । नातिरिच्यते चेत्तर्हि स
मूहालंबने नीलाकारोऽपि पीताकारः स्यात् । स्वरूपतो विज्ञानस्याविशेषात् । अपोहरूपो नीलत्वादि
र्नो विरुद्धानामेकस्मिन्नसमावेशात् । इतरथा विरोधावधारणस्यैव दुरुपपादत्वात् । नच वासनासंक्रमः
संभवति । मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् । नचोपादानोपादेयभावो नियामक इति वाच्यं । वासनायाः
संक्रमासंभवात् । उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात् । विज्ञानस्यैवोत्पादकत्वे त
दा संस्कारानंत्यप्रसंगः । क्षणिकविज्ञानेष्वतिशयविशेषाः कल्प्यंत इति चेन्न मानाभावात् कल्पनागौर
वाच्च । एतेन क्षणिकशरीरेष्वेव चैतन्यमिति प्रत्युक्तं गौरवात् । अतिशये मानाभावात् । बीजादावपि सहका

ननु नीलपीताकारयोरभिन्नावेव नेवप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतत्वयोर्भेदात्स्वतयोरपि विज्ञानरूपत्वाद्भेदः नीलज
देरपारमार्थिकस्य पारमार्थिकविज्ञाने नाभेदासंभवादित्याशयेनाशंकते अपोहेति ॥ ६

नीलजे ... नाकारविशिष्टविज्ञानस्य विज्ञानादभिन्नो पीताकारस्य नीलाकारादभिन्नत्वनियमात् ९
निर्विषयज्ञानस्य प्रकाशे विज्ञानत्वे मानाभावः ज्ञानत्वस्य विषयित्वव्याप्यत्वादिति भावः ५
तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भावः १०
नीलपीतविषयकसमूहालंबने ८
मातापुत्रयोः ... स्थिरे ... येन स्मरणप्रसंग इति भावः ११
उत्तरोत्तरसंस्कारानुकूलत्वरूपा शक्तिविशेषा इत्यर्थः १२
निर्विषयचितो ज्ञानत्वाभावः
धर्मिविज्ञानधर्म इति चेन्न नीलत्वा ८
स एवायमित्यप्र... ...कानंत... गभावत ... नेगौरवादि...

कस्माच्चिदंकुरोत्पत्तिः कस्माच्चिन्नेति नियमोपपत्तेः॥१॥

मायपक्षावलि

॥१५॥

नतु देहस्य वीजादंकुरोत्पत्तिर्नांकुरस्य वीजादतोंकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुताऽवश्यं कुर्वजनकतावच्छेदकतावच्छेदकजातिविशेषः एवमवश्यं कुर्वद्रूपत्वेन क्षणिकशरीरभूतशरीरनिष्ठा सम्मोत्पादकत्वं वाच्यं मतअदवीजादि निकुरंकुरस्य वीजेषु नू जनसंयोगादि सहकार्यसमवधानादेवांकुरानुत्पत्तेः कुर्वद्रूपत्वं न कल्पनीयं॥

वेदांती शंकते॥

समवधानासमवधानाभ्यामेवोपपत्तेः। कर्तृरूपत्वाकल्पनात्। अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यवि
ज्ञानमेवात्मा अविनाशी वा अरेयमात्मा सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतेश्चेति चेन्न तस्य सविषयत्वास्य समव
स्थितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात्। सविषयकत्वस्यानुभवात्। अतो ज्ञानभिन्नो नित्य आत्मे।
ति सिद्धं। सत्यं विज्ञानमिति ब्रह्मपरं जीवे गुणोपचर्यते। ज्ञानाज्ञानसुखित्वासुखित्वासुखित्वादिभिर्जीवानां भे
दसिद्धौ सुतरामीश्वरभेदोन्यथा बंधमोक्षानुपपत्तेः। योगीश्वराभेदबोधको वेदः सोपि तदभेदेन तदीयत्वं प्रतिपा
दयन् स्तौति। अभेदभावनयैव यतितव्यमिति वदति। अत एव सर्वेषामात्मानः समर्पिता इति श्रूयते। सोऽहं
भावयामज्ञाननिवृत्तावभेदो जायत इत्यपि न। भेदस्य नित्यत्वेन नाशायोगात्। भेदनाशेपि व्यक्तिद्वयं स्यास
त्येव। नच द्वित्वमपि नश्यतीति वाच्यं। तत्र निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तदितिवत् द्वि।
त्वाभावेपि द्वयात्मकौ ताविति युक्तत्वात्। मिथ्यात्वाभावोधिकरणात्मकस्तत्र सत्यत्वमिति चेद् एक
त्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्युच्यतां। एतेनैकमेकत्वेपि पृथिवीजलयोर्न गंध इति वदन्नयं नैक
मित्यसंगतवचनसिद्धत्वात्। योपि तदानीमभेदप्रतिपादक आगमः सोपि निर्दुःखत्वादिना साम्यं प्रतिपाद
यति संपदाधिक्ये पुरोहितोयं राजा संवृत्त इतिवत्। अत एव निरंजनः परमं साम्यमुपैतीति श्रूयते। ईश्वरोपि

हि पु तो

ब्रह्मविद्ब्रह्मैव भवतीत्यागमः॥२

द्वितीयदोषमाह॥

आत्ममात्रस्य निज्ञानरूपत्वमीश्वरस्यैवेति विकल्पे दूषणमाह तस्येति॥२

जीवब्रह्मणोरैक्यात् निजज्ञानरूपत्वं जीवस्य निराबाधमिति तयोर्भेदं साधयति ज्ञानेति॥४॥

॥राम१५॥

अधिकारणत्वमुक्तं तेन॥ १५

॥ननु कारण... प्रकर्तृत्वमस्तु इति तस्याः कारणत्वं साधयति॥६ श्री॥ ॥अक्षणाकल्पनमेव तत्र... अस्तु वेति॥२

आनंदवदित्यर्थ... आनंदमेतेन व प्रमाने... सुखाभावादित्व... आह्लानंदोपीति॥२

नज्ञानसुखात्मा किंतु ज्ञानाद्याश्रयः। नित्यं विज्ञानमित्यादौ विनिपदं ज्ञानाश्रयएवोक्तः॥ यः सर्वज्ञ इत्यादि
उरोधात्। आनंदमित्यस्याप्यानंदवदित्यर्थः॥ अर्शआदित्वान्मत्वर्थीयोच्प्रत्ययः॥ अन्यथा पुल्लिंगत्वापत्तेः
आनंदोपि दुःखाभावेनोपचर्यते माराद्यपगमे सुखी संवृत्तोहमितिवत्। अस्तु वा तस्मिन्नानंदो न त्वसावानं
दः। अप्रसुखमिति श्रुतेः॥ नविद्यते सुखं यस्येति कुतो नार्थ इति चेन्न। क्लिष्टकल्पनापत्तेः प्रकरणविरोधाच्च। आनंद
मित्यत्र मत्वर्थीयाच्प्रत्ययविरोधाच्चेति संक्षेपः। एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किंतु चेतनः
कार्यकारणयोरभेदात्कार्यनाशे सति कार्यरूपतया नाशो विरूपादित्यकारणत्वं तस्य। बुद्धिगुणचैतन्याभिमाना
न्यथानुपपत्त्या तत्कल्पनं बुद्धिश्च प्रकृतेः परिणामः सैव महत्तत्त्वं अंतःकरणमित्युच्यते। तस्यां स्वास्वत्वाः पुरु
षस्य संसारापवर्गौ। तस्या एवेंद्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिनासंबंधः। पुरुषे कर्तृत्वाभिमानो बु
द्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिंबादता
त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपरागः। इंद्रियप्रणालिकया परिणतिभेदस्तु तात्विको निश्वासा
भिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति व्यापारावेशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्याता।

ननु सुरूपेण... स्वनिर्बाधनादित्व... एतेन व... नेति मतसारस्य मत... ना॥७

स्यादानंदप्रसुरानंद इति कोशः॥२

बद्धजीवावस्थायां... णपत्तेरित्यर्थः॥४ कर्तृत्वं जातं तःकरणत्व... इतिः... करणेएवेति॥७

मुक्तावलीप्र ॥१६॥

अदृष्टस्यातीन्द्रियत्वे विधार्मिकोहं करोमीति तदंशे उपनीतभानरूपं तत्संसर्गांशे से ॥२

बुद्धौ प्र ... र्यत्वाभावादित्यर्थः ॥५॥

त्विकसंबंधः। दर्पणस्य मलिन्ये व मुखस्योपलब्धिमच्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धे
रेव। कृतिसामानाधिकरण्येन प्रतीतेः। ननु बुद्धिश्चेतना परिणामित्वादिति मतमपास्तं। कृत्यदृष्टभोगानामि
व चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः। तद्भिन्नमानाभावात् चेतनोहं करोमीति प्रतीतिः। परिणामित्वाच्चेत(
न्यांशे भ्रम इति चेत् कृत्यंशेपि किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः। अचे
तनायाः प्रकृतेः कार्यत्वाद् बुद्धेरचेतनत्वं कार्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः। कर्तुर्जन्यमाना
भावात्। वीतरागजन्मादर्शनादनादित्वमनादिभावस्य नाशासंभवान्नित्यत्वं। तत्किं प्रकृत्यादिकल्पनेन
ननु प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन विरोध इ
ति वाच्यं। प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात्। तत्रैवं सति कर्तारमा
त्मानं केवलं तु यः इत्यादि वदता भगवता प्रकटीकृतो यमुपरिष्टादाशय इति संक्षेपः। धर्माधर्माश्रय इ
ति। आत्मेनुपपद्यते शरीरस्य तदाश्रयत्वे देहांतरकृतकर्मणां देहांतरे भोगानुपपत्तेः। अध्यक्षो विभुः।
षड्गुणयोगतः। योग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं संभवति। न त्वन्यथा अहं जाने अहं करोमीति

कर्तृत्वे तत्र योर्ले दं
गीकारे चेतनस्य
र्लिप्तया संसार
वर्गे बुद्धिमत्त्वाभ
हेतु वाच्यो तथा च
बुद्धिनित्यत्वानि
त्यत्वे दोषः ॥४

बुद्धिकारणतया इ
त्यर्थः ॥७

॥रामः १६॥

ः प्रतीतेर्न केवलात्मवि
षयकप्रतीतेरनुभवा
त् । प्रवृत्त्याद्युपायं ।
अथ मात्मा परदेहादौ
प्रवृत्त्यादिनानुमीयते ।
प्रवृत्तिः रथचेष्टा ज्ञा
नेच्छाप्रयत्नादीनां दे
हे ऽभावस्योक्तप्राय
त्वाच्चेष्टायाश्च प्रयत्न
साध्यत्वाच्चेष्टया प्रय
त्नेनात्मानुमीयते ।
~~तथा चेष्टात्मके~~ इति
भावः । अत्र दृष्टांत
माह । रथगत्येव सार
थि । यद्यपि रथकर्म
चेष्टा न भवति तथा
पि तेन कर्मणा सार
थिर्यथानुमीयते त
था चेष्टात्मकेन क
र्मणा परात्मा प्रीति
भावः । ८ अहंकारस्याश्रयोयं । अहंकारोहमिति ॥

प्रत्ययस्तु स्वाश्रयो विषय आत्मा न शरीरादिरिति । मनोमात्रस्य गोचरः । मनो भिन्नेंद्रियजन्यप्रत्यक्षाविषयः
मानसप्रत्यक्षविषय इत्यर्थः । रूपाद्यभावेनेंद्रियांतरायोग्यत्वात् । विभुर्बुद्ध्यादिगुणवान् । विभुत्वं परममह
त्त्वं । तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं । बुद्धिः सुखं दुःखमिच्छादयश्चतुर्दशगुणाः पूर्वमुक्ता वेदितव्याः । अत्रैवं
प्रसंगात्कतिपयां बुद्धेः प्रपंचं दर्शयति । बुद्धिस्तु द्विविधा मता । द्वैविध्यमुत्पादयति । अनुभूतिः स्मृतिश्च स्याद
नुभूतिश्चतुर्विधा । प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे । एतासां चतसृणां करणानि चत्वारि प्रमाणानि प्र
त्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि । तत्रेंद्रियजन्यं ज्ञानं प्रत्यक्षं यद्यपि मनोरू
पेंद्रियजन्यं सर्वमेव ज्ञानं तथापींद्रियत्वेन रूपेणेंद्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितं ।
ईश्वरस्य प्रत्यक्षं तु न जन्यं इंद्रियार्थसन्निकर्षोत्पन्नमिति सूत्रे तथैवोक्तत्वात् अथवा ज्ञानाकरणकं
ज्ञानं प्रत्यक्षं अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणेऽनुभवस्य करण
त्वान्न तत्रातिव्याप्तिः इदं लक्षणमीश्वरप्रत्यक्षसाधारणं परामर्शजन्यं ज्ञानमनुमितिः यद्यपि परामर्शप्रत्यक्षा
दिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः नन्वकादाचित्कहेतुविषयकानुमि

19

तावद्व्याप्तिरिति वाच्यं॥ तादृशज्ञानत्वस्यानुमितित्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ अथवा व्याप्तिज्ञा
नकरणकं ज्ञानमनुमितिः॥ एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः॥ पदज्ञानकरणकं ज्ञानं शाब्दबोधः
वस्तुतो यत्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वमनुमि
तित्वं॥ एवं यत्किंचित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षादिकं वाच्यमिति जन्यप्र
त्यक्षाणि विभजते घ्राणजादिप्रभेदेन घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रोत्रं मानसमिति प्रत्यक्षं षड्विधं मतं नन्वी
श्वरप्रत्यक्षस्याविभजनान्न्यूनत्वमिति जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात् घ्राणस्य
गंध गोचरो गंधो गंधत्वादिरपि स्मृतः गोचरः ग्राह्य इत्यर्थः गंधत्वादिरित्यादिपदात् सुरभित्वादिपरिग्रहः गंधस्य
प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यं तथा रसो रसज्ञायाः
रसत्वादिसहित इत्यर्थः तथा शब्दोपि च श्रुतेः तथा शब्दत्वादिसहितः गंधो रसश्चोद्भूतो बोध्यः उद्भू
तरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तं
क्रियाजातिर्योग्यवृत्तिः समवायश्च तादृशः गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः ग्रीष्मोष्मा

दावनुद्भूतमितिनपक्षे तदंशस्युद्भूतरूपवत्वंति योग्येति इत्यस्कादिकमपियोग्यव्यक्तिवृत्तित्वोध्यं तादृशो
योग्यव्यक्तिवृत्तिरित्यर्थः आलोकसंयोगउद्भूतरूपं चचाक्षुषप्रत्यक्षेकारणं तत्रद्रव्यचाक्षुषप्रतित
योः समवायसंबंधेनकारणत्वं द्रव्यसमवेतरूपादिप्रत्यक्षेस्वाश्रयसमवायसंबंधेनद्रव्यसमवेतसमवेतस्य
रूपत्वादेः प्रत्यक्षेस्वाश्रयसमवेतसमवायसंबंधेनेति उद्भूतस्पर्शवद्द्रव्यंगोचरःसोपित्वचः सोप्युद्भूत
स्पर्शोपिस्पर्शत्वादिसहितः रूपान्यच्चक्षुर्योग्यं रूपभिन्नंरूपत्वादिभिन्नंचयच्चक्षुर्योग्यंतत्त्वगिंद्रि
यस्यापिग्राह्यं तथाचपृथक्त्वसंख्यादयोपिचक्षुर्ग्राह्यगुणाउक्ताः एवंक्रियाएवंजातयोयोग्यवृत्तयश्च त्व
चोग्राह्याइति रूपमत्रापिकारणंद्रव्याध्यक्षे आत्मापित्वगिंद्रियजन्येपिद्रव्यप्रत्यक्षेरूपंकारणं तथाचब
हिरिंद्रियजन्यद्रव्यप्रत्यक्षेरूपंकारणमिति नवीनास्तुबहिर्द्रव्यप्रत्यक्षेनरूपंकारणंप्रमाणाभावात् किं
तुचाक्षुषप्रत्यक्षेरूपंस्पार्शनप्रत्यक्षेस्पर्शः कारणं अन्वयव्यतिरेकात् बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमा
त्रेकिंकारणमितिचेन्नकिंचित् आत्मावृत्तिशब्दभिन्नविशेषगुणवत्वंचाश्योजकमस्तु रूपस्यकारण
त्वेलाघवमितिचेन्नवायोस्त्वगिंद्रियेणाग्रहणप्रसंगात् इष्टापत्तिरितिचेत्स्पर्शएवलाघवात्कारणमस्तु

प्रमायाश्च प्रत्यक्षे त्वविष्टापत्तिरेव किं न स्यात् तस्मात्त्वमनां प्रपश्यामीति व्यवहारात्तु स्मृज्ञामीति प्रत्यक्षस्य सत्त्वाद्वा
योरपि प्रत्यक्षत्वं न स्यात्येव बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रत्यक्षयोरेकत्वं दृष्टं तद्व
त्क्षविद्वित्वादिकमपि त्वक्त्वसंख्यापरिमाणप्रदेशो दोषादिस्पर्शाङ्कः त्वचो योगो मनसा ज्ञानकारणं।
त्वङ्मनःसंयोगो ज्ञानमात्रे कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन
मनसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं ज्ञानं न जायते अनुभवरूपं स्मरणरूपं वा नाद्योऽनुभव
सामग्र्यभावात् तथा हि प्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षं
ज्ञानादेरभावादेव न मानसप्रत्यक्षं ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति व्याप्तिज्ञानाभावादेव नानुमि
तिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोध इत्यनुभवसामग्र्यभावान्नानुभवः उद्बो
धकाभावाच्च न स्मरणमेवं सुषुप्तिप्राक्काले आत्मनीच्छादिकमस्ति तत्संबंधेनात्मनः प्रत्यक्षप्रसंगात् तदती
न्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायत इत्यत्रापि प्रमाणाभावात् अ
थ ज्ञानमात्रे त्वङ्मनःसंयोगस्य कारणत्वे तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् विषयत्व

कर्मसंयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्परप्रतिबंधादेकमात्रभावानुत्पादितिं अन्ये केचित्पूर्वोक्तयु
क्त्या त्वङ्मनोयोगस्य हेतुत्वसिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमनुभवानुरोधात्कल्प
नइति अन्ये तु सुषुप्त्यनुरोधाच्चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसं
योगाभावात् न त्वाचप्रत्यक्षमिति मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः मनोजन्यप्रत्यक्षविष
य इत्यर्थः मतिर्ज्ञानं कृतिः प्रयत्नः एवं सुखत्वादिकमपि मनोग्राह्यं एवमात्मापि मनोग्राह्यः किं तु म
नोमात्रस्यागोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तं ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते चक्षुःसंयो
गादनंतरं घट इत्याकारकं घटत्वादिविशिष्टज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावा
त् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि
ज्ञानं जायते तदेव निर्विकल्पकं तच्च न प्रत्यक्षं तथाहि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न सं
भवति घटमहं जानामीति प्रत्ययात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते तत्र घटस्तत्र घटत्वं । स्थाने घटः
प्रकारो यः स एव विशेषणमित्युच्यते विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते ।
विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं निर्विकल्पके घटत्वादिकं न

न्यायमुक्तावली
१९

प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञानेन संभवति घटत्वाद्यप्रकारकं च घटा
दिविशिष्टज्ञानं न संभवति जात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात् मह
त्त्वं षड्विधे हेतुः द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन कारणं द्रव्यसमवेतानां गुणकर्मसामान्या
नां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतानां गुणत्वरूपत्वकर्मत्वादीनां प्रत्य
क्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति इंद्रियं करणं मतं अत्रापि षड्विधस्याप्युप
ज्यते इंद्रियत्वं तु न जातिः पृथिवीत्वादिना सांकर्यप्रसंगात् इंद्रियत्वं तु शब्देतरोद्भूतविशेष
गुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिति आत्मादिवारणाय सत्यंतं
उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वात् शब्देतरेति विशेषगुणस्य रूपादेश्चक्षुरादिसत्त्वादुद्भूतेति
उद्भूतत्वं न जातिः शुक्लत्वादिना सांकर्यात् न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं
उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यमनुद्भूतत्वं ना
ना तदभावकूटश्चोद्भूतत्वं तत्र संयोगादावपि तथा च शब्देतरोद्भूतगुणः संयोगादिश्च
चक्षुरादावस्त्यतो विशेषेति कालादिवारणाय विशेषपदं इंद्रियावयवविषयसंयोगस्या रामः १९